National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 26-28
© 2025 NJHSR
www.sanskritarticle.com

**Bharati Balte.**
Associate Professor,
Sir Parashurambhau College,
Mahrashtra, Pune-411030.

**Correspondence:**
**Bharati Balte.**
Associate Professor,
Sir Parashurambhau College,
Mahrashtra, Pune-411030.

# ऋग्वर्णक्रमलक्षणे वर्णक्रमविचक्षणः।

**डॉ. भारती बालटे**

अनन्यतमं वेदाङ्गेषु शिक्षाग्रन्थानां स्थानम्। वेदाङ्गेषु प्रथमस्थाने वर्तमानं वेदाङ्गं नाम शिक्षावेदाङ्गम्। 'शिक्षा घ्राणं तु वेदस्य'[i] इत्येतद्वचनं प्रसिद्धमेव। कस्यापि प्राणिनः, घ्राणम् अथवा नासिका श्वासोच्छवासस्य साधनमेव। कोऽपि प्राणी घ्राणद्वारा श्वसनक्रियया एव जीवन् दृश्यते एतादृशमेव शिक्षाःपघ्राणद्वारा एव सम्यग्वेदोच्चारणं कृत्वा वेदरक्षणम् अतीव महत्त्वपूर्णम्। आधुनिककालेऽपि गुरुशिष्यपरंपरागतः वेदाध्ययनसंप्रदायः स्वरवर्णमात्रासु मात्रावैकल्येऽपि महाननर्थो भवेदिति समाचक्षते।

यथा पाणिनीयशिक्षायां निर्दिष्टम्-

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।।[ii]

अस्मिन् श्लोके इन्द्रविषयिणी एका प्राचीना आख्यायिका निर्दिष्टा। स्वरविपर्यासेण महान् अनर्थः कथं संभवति? इत्येतत् प्रतिपादितं तत्र। प्राचीनाः ऋषयः वर्णोच्चारणविषये कियन्त दक्षाः इत्येतदेव अस्मात् ज्ञायते। अद्यापि केचन जनाः एतां परम्परां रक्षन्ति।

तैत्तिरीयोपनिषदि अपि शिक्षावल्ल्याम् 'अथ शीक्षां प्रवक्ष्यामि' - इत्येतत् प्रारभ्य शिक्षायाः वर्णः, स्वरः, मात्रा, बलं, साम, सन्तानः एतानि शिक्षाङ्गानि कथितानि[iii]। तथा च 'शिक्षा नाम शिक्ष्यतेऽनयेति वर्णाद्युच्चारणलक्षणम्, शिक्ष्यन्ते वा शिक्षा वर्णादयः'। इत्येतादृशं स्पष्टीकरणं शङ्कराचार्यैः कृतम्[iv] वेदमनुसृत्य उच्चारणं निश्चितम् अत एव प्रत्येकवेदसम्बन्धिनः स्वतन्त्राः शिक्षाग्रन्थाः दृश्यन्ते। एतेषु - पाणिनीयशिक्षा, याज्ञवल्क्यशिक्षा, वसिष्ठीशिक्षा, कात्यायनीशिक्षा, पाराशरीशिक्षा, माण्डव्यशिक्षा, अमोघनन्दिनीशिक्षा, माध्यन्दिनीशिक्षा, वर्णरत्नप्रदीपिकाशिक्षा, केशवीशिक्षा, मल्लशर्मशिक्षा, नारदीयशिक्षा, माण्डुकीशिक्षा इत्येते ग्रन्थाः प्रसिद्धाः[v]। एते शिक्षाग्रन्थाः प्राचीनभारतीयानां भाषाशास्त्रविषयकं वैज्ञानिकं ज्ञानं दर्शयन्ति। एतेषु शिक्षाग्रन्थेषु अन्यतमः ग्रन्थः 'ऋग्वर्णक्रमलक्षणम्' इत्याख्यः शिक्षाग्रन्थः।

'ऋग्वर्णक्रमलक्षणम्' इत्याख्यस्य ग्रन्थस्य बहिरङ्गम् - 'ऋग्वर्णक्रमलक्षणम्' इत्याख्यः ग्रन्थः नव-पञ्च-नव-एकतमे(1959) ख्रिस्ताब्दे मद्रासस्थितस्य अड्यारग्रन्थालयस्य संशोधनकेन्द्रतः पुनः प्रकाशितः। एष ग्रन्थः Adyar library pampleht series 35 Bulletin vol. XXIII] (part1 & 2½) इत्येतस्मिन् पूर्वप्रकाशितः आसीत्[vi]। अस्य ग्रन्थस्य प्रस्तावनायाः ज्ञायते यत् अस्य ग्रन्थस्य एका मातृका जीर्णतालपत्रमयी विश्वभारतीकोषागारात् समुपलब्धा। अस्य द्वितीया मातृका अद्यावधि नोपलब्धा। ग्रन्थगौरवमादृत्य एकमेव मातृकाकोशमुपजीव्य वे. कृष्णमाचार्येण ग्रन्थस्यास्य मुद्रणं सम्पादितम्। अस्मिन् ग्रन्थे चतुश्चत्वारिंशद् अनुष्टुब्श्लोकाः वर्तन्ते। अस्य रचयिता नरसिंहसुधीः। संस्कृतविदुषां परम्परामाश्रित्य ग्रन्थकारेण स्वविषये किमपि नोक्तम् परन्तु ग्रन्थशैलीम् अनुसृत्य अस्य कालः

एकोनविंशतिशतक' भवेद् इत्येष तर्कः[vii]। नरसिंहसुधिया स्वकीयमूलग्रन्थस्य व्याख्यापि विरचिता। एषा मातृकाकोशसंग्रहालये जीर्णतालकोशे उपलब्धा। एवं शिक्षाग्रन्थोपरि विद्यमानां स्वोपज्ञां दुर्लभां व्याख्यामनुशीलितुम् एष यत्नः।

ग्रन्थोऽयं मङ्गलाचरणेन प्रारभते यथा-

केशरूपधरं विष्णुं नरसिंहो नमन् सुधीः।
तनोति पूर्वशास्त्रोक्तमृग्वर्णक्रमलक्षणम्।[viii]

अस्य श्लोकस्य व्याख्यायां नरसिंहसुधिया केश इत्यस्य विग्रहः कः, अः, ईशः इत्येतादृशः कृतः। एतेषां अर्थः अनुक्रमेण 'कः' नाम ब्रह्मदेवः 'अ' नाम विष्णुः तथा च 'ईशः' नाम रुद्रः[ix]। नरसिंहः एवं केशरूपधरं विष्णुं विराट्पुरुषं ऋग्वर्णक्रमलक्षणग्रन्थे प्राणमत्।

पदक्रमविभागज्ञः, वर्णक्रमविचक्षणः स्वरमात्राविशेषज्ञश्च आचार्य-संसदं गन्तुं कथं योग्यः तद्द्वितीये श्लोके आह[x] -

अस्याः कारिकायाः स्पष्टीकरणसमये नरसिंहसुधिया निर्दिष्टं यवर्णाः स्वरव्यञ्जनादयः। तेषां क्रमः नाम अनुक्रमः। वर्णज्ञाने सत्यपि पदक्रमविभागज्ञानमावश्यकम् अत एव पदक्रमविभागज्ञः इत्येतत् पृथग्निर्दिष्टम्। पदानि व्याकरणसिद्धानि तेषु वैकृतप्राकृत-नामाख्या-तोपसर्गनिपातपदानां ज्ञानम्। क्रमः बाभ्रव्याचार्यप्रणीतः संहिताप-दोभयात्मकः। तद्विभागः क्रमभेदः।[xi]

तृतीये श्लोके पुनः पूर्वशास्त्रोक्तम् इत्यस्य स्पष्टीकरणसमये प्रातिशाख्यव्याकरणयोः सन्दर्भं दत्वा सूचितम् -

तल्लक्षणं प्रातिशाख्याज्ज्ञेयं व्याकरणात्क्वचित्[xii]। प्रातिशाख्यस्पष्टी-करणसमये व्याख्यायामुक्तम्

जपादौ नाधिकारोऽस्ति सम्यक्पाठमजानतः।
प्रातिशाख्यमतो ज्ञेयं सम्यक्पाठस्य सिद्धये॥[xiii]

एवं सम्यक्पाठसिद्ध्यर्थं प्रातिशाख्यज्ञानमावश्यकम्। प्रातिशाख्ये अनेकलक्षणसद्भावे अपि प्रकृते वर्णक्रमविचक्षणैः विज्ञेयाः विषयाः ऋग्वर्णक्रमलक्षणे सार्धश्लोकत्रयेण उक्ताः।

यथा

द्वित्वं चाभिनिधानं च प्रतिषेधस्तयोः क्रमात्।।
सोष्मणः पूर्वरूपं च सोष्मा पूर्वस्य चागमः।
यमा यमनिषेधश्च विवृत्तिः स्वरभक्तयः।।
नासिक्यानासिका वर्णा लुप्ताः प्राकृतावैकृताः।
विसर्गजिह्वामूलीयानुपध्मानीय एव च।।
अनुस्वारः कम्परङ्गौ ह्रस्वः प्लुतमिति क्रमात्।[xiv]

एते प्रायेण विज्ञेयाः, वर्णक्रमविचक्षणाः द्वित्वादीन् जानीयुः। नरसिंहसुधिया व्याख्यायां द्वित्वम् -एकस्य वर्णस्य द्विरुक्तिः।[xv] इत्येतादृशं सर्वं सुलभतया वर्णितम्। सोष्मा इत्येतस्य पदस्य स्पष्टीकरणावसरे 'वर्गद्वितीयचतुर्थाः सोष्मा' इत्येतत् वर्णितम्।[xvi] एवं ख्,घ्,छ्,झ्,ठ्,ढ्,थ्,ध्,फ्,भ् इत्येते वर्णाः सोष्माणः। अत्रैव वर्णक्रमविचक्षणैः विज्ञेयेषु एको विशेषः उपलभ्यते स नाम उष्मणां संख्याविशेषः। सामान्यतः पाणिनीयव्याकरणे 'शल उष्माणः' इत्येतत् वचनं प्रसिद्धम्। शल्प्रत्याहारे श्, ष्, स्, ह् इत्येते चत्वारः एव उष्माणः समाविष्टाः। अस्मिन् ग्रन्थे इतोऽपि चत्वारः उष्माणः नाम आहत्य अष्ट उष्माणःसमाविष्टाः।ग्रन्थकारेण व्याख्यायां विवृतम् -

'विसर्गः नाम अचः परो वर्तमानः पञ्चम उष्मा। जिह्वामूलीयः य कखाभ्यां प्रागर्धविसर्गसहितः।

उपध्मानीयः य फफाभ्यां प्रागर्धविसर्गसहितः। अनुस्वारः य अचः परः सानुनासिकस्वरव्यञ्जनामात्मकः स्वरव्यञ्जनभिन्नोऽष्टम उष्मा।[xviii]

एवम् उष्मणः अष्ट प्रकाराः ग्रन्थेऽस्मिन् वर्णिताः। द्वित्वादारभ्य विज्ञेयाः विषयाः नरसिंहसुधिया सोदाहरणं प्रतिपादिताः।

यद्यपि अस्मिन् ग्रन्थे उपपादितेषु विषयेषु केचित् व्याकरणे कृतपरिचयानां व्युत्पन्नानां विषये सुविदिता एव तथापि बहवः प्रातिशाख्यादिशिक्षादिलक्षणग्रन्थैकसमधिगम्या इत्येतादृशेन प्रति-पादनेन एष ग्रन्थः महोपकारकः इत्यपि प्रस्तावनायां निर्दिष्ट-मुचितमेव।[xix]

उदाहरणार्थम् अनचि च (८.४.४७) शरः खयः(वार्तिक) अचो रहाभ्यां द्वे इत्येताभिः सूत्रवार्त्तिकैः अनुगम्यमानं द्वित्वं नरसिंह-सुधिया कारिकारूपेण निर्दिष्टम् यथा

स्वरानुपूर्वो हल् द्वित्वमाप्नोति हल्परः।
शषसेभ्यश्च वर्गाद्यौ लात् स्पर्शा रहयोर्हलः॥[xx]

अस्याः व्याख्यायां निर्दिष्टं यत् स्वराः अकाराद्यौकारान्ताः। अनुस्वारः पूर्वोक्तः। तदन्यतमपूर्वको हल् ककारादिहकारान्तः द्वित्वमाप्नोति, हलि परे सति, देवेब्भ्यः, आप्प्यायस्व इत्येतादृशानि उदाहरणानि अपि निर्दिष्टानि।[xxi] एतैः नियमैः व्यवहारे उपयुज्य-मानानाम् उदाहरणानां परीक्षणं कर्तुं शक्नुमः यथा 'विट्ठलः' इत्येतस्मिन् उदाहरणेऽपि स्वरपूर्वः हल् अतः आदौ तस्य द्वित्वं भवति अनन्तरम् 'अभ्यासे चर्च' इत्यनेन सूत्रेण 'ठ्' इत्येतस्य वर्णस्य चर्त्वं नाम टकारः भवति।[xxii] एवं सोदाहरणं नरसिंहसुधिया चिन्तितम्। व्याकरणसूत्रेषु न दृश्यमानं हकारादेः द्वित्वविधानं नरसिंहसुधिया वर्णितम् यथा

संयुक्तोष्मा त्वनुपधो नङौ ह्रस्वात् स्वरेन्तगौ।
अपदान्ते तु दीर्घाच्छः ह्रस्वाच्छो मातपरोपि वा।।[xxiii]

अस्याः स्पष्टीकरणसमये प्रोक्तम्-

संयुक्तोष्मा त्वनुपधः य अविद्यमानपूर्वकाः हल्परकाः हशषसाः द्विः।[xxiv] एतस्य स्पष्टीकरणार्थं निर्दिष्टानि कानिचन उदाहरणानि-ह्ह्वयामि, श्श्यावाश्वस्य, स्स्तुषे। तथा च पदकृत्यं कृत्वा सकलतया स्पष्टीकरणं कृतं यथा- 'संयुक्तेति किम्'? स नः इत्यत्र सस्य द्वित्वं न भवति यतः स इत्येष न संयुक्तोष्मा। एवं नरसिंहसुधिया दत्तानि उदाहरणानि चिन्त्यानि। अन्ततो गत्वा नरसिंहसुधिया प्रोक्तम् -

प्रायेण स्वरमात्रादिस्थानवर्णगुणा अपि।
वर्णक्रमज्ञैर्वक्तव्याः संक्षिप्येदं प्रकाशितम्।
वेदपारगपादाब्जनतेन विदुषां मुदे।।[xxv]

एवं वर्णक्रमज्ञैः स्वरमात्रादिस्थानवर्णगुणा अपि वक्तव्याः किन्तु मया वेदपारगपादाब्जनतेन विदुषां मुदे संक्षिप्येदं प्रकाशितम् इत्येतत् ग्रन्थकारेण विनम्रतया प्रतिपादितम्। व्याख्यायाम् अपिशब्दात् स्पर्शान्तःस्था ज्ञेयाः य तथापि तेषां बाहुल्यात् उक्तमात्रमवश्यं ज्ञेयमित्यपि निर्दिष्टम्।

ग्रन्थस्यास्य विचारः शिक्षाग्रन्थस्य विकासे अतीव उपयुक्तः समयाभावात् अत्र केवलं वर्णक्रमविचक्षणविषये प्रतिपादितम् एतस्य ग्रन्थस्य अन्या कापि मातृका व्याख्या वा उपलब्धुं शक्यते किम्? इत्येष अग्रिमसंशोधनविषयः। अस्य ग्रन्थस्य अन्यशिक्षाग्रन्थैः सह तुलनां कृत्वा अधिकाध्ययनमपेक्षितम्। तथा च तत्त्वज्ञानदृष्ट्या अपि चिन्त्यः।

**संदर्भ:**

I. पाणिनीय शिक्षा श्लोकम् 41

II. पाणिनीय शिक्षा श्लोकम् 52

III. तैत्तिरीय उपनिषद् .1.2

IV. तैत्तिरीय उपनिषद् शांकरभाष्य .1.2

V. शिक्षासंग्रहः.पृष्ठम्् 1.2

VI. ऋग्वर्णक्रमलक्षणम्- पृ.क्र.1

VII. ऋग्वर्णक्रमलक्षणम्-पृ.क्र.6

VIII. ऋग्वर्णक्रमलक्षणम्-पृ.क्र. 7कारिका 1

IX. ऋग्वर्णक्रमलक्षणम्-पृ.क्र. 7कारिका 1 व्याख्या

X. पदक्रमविभागज्ञो वर्णक्रमविचक्षणः।

XI. स्वरमात्राविशेषज्ञो गच्छेदाचार्यसंसदम्।। ऋग्वर्णक्रमलक्षणम्- पृ.क्र. 7कारिका 2 व्याख्या

XII. ऋग्वर्णक्रमलक्षणम् -पृ.क्र 8 कारिका 2 व्याख्या

XIII. ऋग्वर्णक्रमलक्षणम् -पृ.क्र 8 कारिका 3

XIV. ऋग्वर्णक्रमलक्षणम् -पृ.क्र 8 कारिका 3 व्याख्या

XV. ऋग्वर्णक्रमलक्षणम् -पृ.क्र 8 कारिका 3 -6

XVI. ऋग्वर्णक्रमलक्षणम् -पृ.क्र 8 कारिका 3 व्याख्या

XVII. ऋग्वर्णक्रमलक्षणम् -पृ.क्र9 कारिका 4 व्याख्या

XVIII. लघुसिद्धान्तकौमुदी- पृ.क्र तुल्यास्य-- सूत्रस्य विवरणम्।

XIX. ऋग्वर्णक्रमलक्षणम् -पृ.क्र9 कारिका 4,5व्याख्या

XX. ऋग्वर्णक्रमलक्षणम्- पृ.क्र.1

XXI. ऋग्वर्णक्रमलक्षणम्- पृ.क्र.8 कारिका 7

XXII. ऋग्वर्णक्रमलक्षणम्- पृ.क्र.9 कारिका 7

XXIII. 'अभ्यासे चर्च' पाणिनीसूत्रम् 8.4.54

XXIV. ऋग्वर्णक्रमलक्षणम्- पृ.क्र.10 कारिका 8

XXV. ऋग्वर्णक्रमलक्षणम्- पृ.क्र.10 कारिका 8 व्याख्या

XXVI. ऋग्वर्णक्रमलक्षणम्- पृ.क्र.26 कारिका 44

**ग्रन्थसूचिः .**

शिक्षासंग्रहः, सम्पादकः राजेन्द्रलालमित्रः, एशियाटिक सोसायटी ऑफ बंगाल्, १८७२ ।

तैत्तिरीयोपनिषत्, अष्टादश-उपनिषदः, सम्पादकौ लिमये वि.प्र. वाडेकर , वैदिक संशोधन-मण्डलम्, पुणे १९७५ ।

तैत्तिरीयोपनिषद्शाङ्करभाष्यम् , सम्पादकः हरिनारायणआपटे, मोतीलाल बनारसीदास, १९८० ।

अष्टाध्यायी (पाणिनीयसूत्राणि), सम्पादकः कात्रे एस्. एम्., मोतीलाल बनारसीदास, १९८७ ।

ऋग्वर्णक्रमलक्षणम् , सम्पादकः वी. कृष्णमाचार्यः, एड्यार लाइब्ररी एण्ड रिसर्च इन्स्टिट्यूटए १९५९ ।

लघुसिद्धान्तकौमुदी, सम्पादकः एम्. आर् काळे, मोतीलाल बनारसीदास, १९६१ ।

पाणिनीयशिक्षा, सम्पादकः मनोमोहनघोषः, कलकत्ता विश्वविद्यालयः, १९३८